# શ્રી શુક્રસ્તોત્રં

શ્રુણ્વન્તુ મુનયઃ સર્વ્વે
શુક્રસ્તોત્રમિદં શુભં
રહસ્યં સર્વ્વભૂતાનાં
શુક્રપ્રીતિકરં શુભં (1)

એષાં સઙ્કીર્ત્તનાન્ નિત્યં
સર્વ્વાન્ કામાનવાપ્નુયાત્
તાનિ શુક્રસ્ય નામાનિ
કથયામિ શુભાનિ ચ (2)

શુક્રઃ શુભગ્રહઃ શ્રીમાન્
વર્ષકૃત્ વર્ષવિઘ્નકૃત્
તેજોનિધિર્ જ્ઞાનદાતા
યોગી યોગવિદાંવરઃ (3)

દૈત્યઃ સઞ્જીવનો ધીરો
દૈત્ય નેત્રો ટ શના કવિઃ
નીતિકર્ત્તાગ્રહાધીશો
વિશ્વાત્મા લોકપૂજિતઃ (4)

શુક્લમાલ્યાંબરધરઃ
શ્રીચન્દનસમપ્રભઃ
અક્ષમાલાધરઃ કાવ્યઃ
તપોમૂર્ત્તિર્ ધનપ્રદઃ (5)

ચતુર્વિંશતિ નામાનિ
અષ્ટોત્તરશતં યથા
દેવસ્યાગ્રે વિશેષેણ
પૂજાં કૃત્વા વિધાનતઃ (6)

યઃ ઈદં પઠતિસ્તોત્રં

ભાર્ગ્ગવસ્ય મહાત્મનઃ
વિષમસ્તોપિ ભગવાન્
દુષ્ટસ્સ્યાન્નત્ર સંશયઃ (7)

સ્તોત્રં ભૃગોરિદમનન્તગુણપ્રદં યો
ભક્ત્યાપઠેચ્ચ મનૂજો નિયતઃશુચિ સન્
પ્રાપ્નોતિ નિત્યમતુલાં શ્રીયમીપ્સિતાર્ત્થાન્
રાજ્યં સમસ્ત ધનધાન્યયુતં સમૃદ્ધિં

**શ્રી શુક્રસ્તોત્રં સમ્પૂર્ણ્ણં**